International Journal of Applied Research 2015; 1(5): 274-276



International Journal of Applied Research

**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 3.4
IJAR 2015; 1(5): 274-276
www.allresearchjournal.com
Received: 19-03-2015
Accepted: 22-04-2015

**डॉ0 इन्द्रेश कुमार झा**
ग्राम+पो0–अफजला बलिया,
थाना–बिरौल, जिला–दरभंगा,
बिहार, भारत

# यजुर्वेदस्य भागद्वयम्

**डॉ0 इन्द्रेश कुमार झा**

**प्रस्तावना:**

सम्प्रदायानुसारं यजुर्वेदः भागद्वये विभक्तोऽस्ति। शुक्लयजुर्वेदरूपेण, कृष्णयजुर्वेदरूपेण च। वाराहपुराणाख्यायिकानुसारं कल्पादौ भगवान् विष्णु शंखासुरनामानं दैत्यं व्यापाद्य तदाप्रतवेदं ब्रह्मणे ददौ। ब्रह्म च तं भागद्वये विभज्यैकं भागं आदित्ये निहितवान्, अपरञ्च भागं स्वपुत्रादिभ्यो वशिष्ठप्रभृतिभ्योऽध्ययन–विधिना प्रायच्छत्, तेऽपि च पुत्र–पौत्रादि–शिष्य–प्रशिष्येभ्यः। ततो द्वापरान्ते मानवानामल्प– स्मरणशक्तिंह्रास–बुद्धिञ्चावगत्य परम–कारुणिको भगवान् वेदव्यासः एकमेव वेदं ऋग्यजुःसमाथर्वक्रमेण चतुर्धा विभज्यैकैकं वेदं क्रमशः पैल–वैशम्पायन–जैमिनि– सुमन्तून् अध्यापयामास। तेऽप्यनेकेभ्यः ददौ। सैषा वेदचतुष्टयी ब्रह्मसम्प्रदाय इति कथ्यते।

श्रूयते यत् पुरा योगीश्वरो याज्ञवल्क्योऽपि अस्यामेव परम्परायाम्महर्षेः शाकल्याद् ऋग्वेदमधीत्य, कस्माच्चित्कारणात्तेन सह विवदमानः सन् तच्छापभिया ततोऽधीतं वेदं परित्यज्य मातामहं वैशम्पायनमुपेत्य ततो यजुर्वेदमधीतवान्। परन्तत्रापि गुरुणा सह विवादकारणात् तदधीतां सर्वां वेदविद्यां त्यक्त्वा नाहं मानुषं गुरुं करिष्यामीति संकल्प्य भगवन्तमादित्यमाराध्य तस्माच्चतुरो वेदानधीतवान्। ततो गुरोराज्ञया अनेकान् शिष्यान् पाठितवान्। सैषा वेदचतुष्टयी 'आदित्यसम्प्रदाय' इति। उक्तञ्च[1]–

ब्रह्मणः सम्प्रदायोऽयं व्याससन्दर्शितोऽभवत्।
विभक्तस्यैव वेदस्य सम्प्रदायो द्विधा मतः।।
ब्रह्मणः सम्प्रदायस्तु आदित्यस्य तथा मतः।
अयातयामसंज्ञोऽयं कृत्स्नकर्म प्रकाशकः।।
यावद् ब्रह्मप्रकाशको रविरूपश्च यो मतः।
ब्रह्मणा सम्प्रदायस्तु मिश्रत्वान्न यो मतः।।

**यजुर्वेदस्य शुक्ल–कृष्णत्वभेदकारणम्**

अथैकदा सभायां सदस्यसंख्या न्यूनकारणात् अनिर्णीत–विषयस्य निर्णयार्थं सर्वैर्ऋषिभि ऐकमत्यार्थं मेरुपर्वते एकत्र गन्तव्यमिति निश्चित्य तत्र कश्चिदृर्षिर्यदि न गच्छेत्तर्हि स ब्रह्महत्यादोषेण लिप्तो भविष्यतीति निर्णयः कृतः। तदनुसारं प्रायः सर्वेऽपि ऋषयस्तत्र समुपस्थिताः, किन्तु महर्षिर्वैशम्पायनः पितुः श्राद्धकारणात् प्रातः ब्राह्ममुहूर्तेऽन्धकारे स्नानार्थं प्रस्थितवान्। स्नानमार्गे कस्मिंश्चित् कोणे कश्चन बालः सुप्त आसीत्। अन्धकारकारणात् स्नानमार्गे गमनकाले महर्षेः पादः बालकोपरिपतितः। येन तद्बालकस्तदैव पञ्चत्वमवाप्तवान्, महर्षिश्च ब्रह्महत्याग्रस्तो जातः। ततो ब्रह्महत्यादोष– निरासार्थं शिष्यानाहूय प्रायश्चित्तार्थं नियुक्तवान्। तेषु सर्वेषु शिष्यः याज्ञवल्क्यः अहमेव सर्वतः सदाचारसम्पन्नः वरीयाञ्चेत्यात्मानं मत्वा गुरुमुक्तवान्गुरो! एते सर्वेऽपि बाला अल्पज्ञाश्च, अहमेकलैव पातकनिवृत्तये अलमस्मीति आदिशत्वितो गमनायैतान्। ततो गुरुर्वैशम्पायनः याज्ञवल्क्योऽयम्महानुद्धतोऽहङ्कारी चेति मत्वा मच्छिक्षार्थं याज्ञवल्क्यमवोचत्–रे याज्ञवल्क्य! त्वम्महानङ्कार्यसि, मित्रापमानकर्ता चासि। अतो मदधीतां सर्वां वेदविद्यां त्यजेति। रूज्ञवल्क्योऽपि गुरोः शापभिया स्वाभिमानकारणाद्वा कृत्स्नां वेदविद्यां तत्क्षणमेव उद्ववाम। ततो वैशम्पायनस्यान्ये शिष्याः तदादेशानुसारं मनुष्य शरीरे नैवोच्छिष्टं ग्राह्यमिति तित्तिरयो भूत्वा त्यक्तां विद्या जगृहु,। ते सर्वेऽपि प्रायः दाक्षिणात्याः आसन्, यतो हि दक्षिणभारते एव तद्वेदस्य प्रचारः प्रायः दृश्यते। उच्छिष्टविचारश्चापि तत्रात्यल्प एव। याज्ञवल्क्य–वमितवेद एव मालिन्यात् पश्चात्तित्तिरै गृहीतंकारणाच्च कृष्णत्वमधिगत इत्येकेषां पक्षः।

**Corresponding Author:**
**डॉ0 इन्द्रेश कुमार झा**
ग्राम+पो0–अफजला बलिया,
थाना–बिरौल, जिला–दरभंगा,
बिहार, भारत

ततो वेदविद्याविहीनकारणाद् दुःखितो याज्ञवल्क्यो वेदविद्या विहीनद्विजशरीरं काष्ठवद् भवतीति मत्वा नाद्यावधि या विद्या केनाप्यधीता सैव मया अध्येतव्येति निश्चित्य भगवन्तमादित्यमाराध्य सन्तोष्य च तस्माद् वाजि (अश्व) रूपधारणाद् आदित्रूज्ञछ् दिनस्य मध्याह्नकाले येषां यजुर्मन्त्राणामध्ययनञ्चकार त एव यजुर्मन्त्राः

शुक्लयजुर्वेदशब्देन प्रसिद्धाः। मध्यन्दिनेऽध्ययनकारणाद् माध्यन्दिनशब्देन, वाजिरूप 'आदित्यात्प्राप्तकारणाद् वाजसनेय' शब्देन चापि प्रसिद्धाः। आचार्यसायणोऽपि मतमिदं स्वीकरोति।

यजुषां कृष्णत्वसम्बन्धे कतिपयेषामाचार्याणम्मतेऽन्यान्यपि कारणानि सन्ति। तत्र वेदशाखापर्यालोचनानुसारम्–

1. शुक्लयजुर्वेदशाखाऽध्यायिनो वेदोपाकर्माणि श्रावणशुक्लयतुर्दशीयुक्तां पूर्णिमां स्वीकुर्वन्ति, किन्तु कृष्णयजुर्वेदिनो भाद्रपदकृष्णपक्षस्य प्रतिपदयुक्तां पूर्णिमां स्वीकुर्वन्ति। एवमुपाककर्मणि कृष्णपक्षस्य प्राधान्यात् तैत्तिरीयशाखानां नाम कृष्णयजुर्वेदः।
2. ऋषि–दैवत–छन्दसां बोधकस्य तैत्तिरीयसर्वानुक्रमणीग्रनस्यि अस्तव्यस्तताकारणा– दपि कृष्णत्वं सम्भवः।
3. कृष्णचजुर्वेदस्य श्रौतसूत्रादि–कल्पग्रन्थानामनेके आचार्याः सन्ति। तैराचार्ये रचितविभिन्नकल्पसूत्रेषु एकस्यैव मन्त्रस्य विभिन्नस्थानेषु विनियोगः निर्दिष्टोस्ति। यथा–ध्रुवा अस्मिन् गोपतौ स्यात्'[2]इत्यादिमन्त्रस्य विनियोगो बौधायनेन अध्वर्युकतृकयजमानस्यावेक्षणे कृतो दृश्यते, किन्तु आपस्तम्बेन गवां प्रत्यावर्तनेऽस्य विनियोगः कृतोऽस्ति। एवम्प्रकारेण विनियोगे एकस्यैव मन्त्रस्य वैविध्यात् प्रयोगसांकर्याच्च यजुर्वेदस्य कृष्णत्वं सम्भवः।
4. शुक्लयजुर्वेदस्य संहिताभागः पृथग् वर्तते ब्राह्मणभागश्च पृथग् वर्तते, किन्तु कृष्णयजुर्वेदस्य संहिताभागे ब्राह्मणभागस्य ब्राह्मणभागे च संहिताभागस्य सम्मिश्रणकारणादपि तस्य कृष्णत्वं सम्भवतः।
5. कृष्णयजुर्वेदे सारस्वतभेदेन आर्षेयभेदेन च द्वेविध्यं दृश्यते। एवम् पाठद्वैविध्येन अनियत अनियत–क्रमभूतकारणाद् एतस्य कृष्णत्वं सम्भवः।
6. कृष्णयजुर्वेदे याज्ञिकाः कलपसूत्रेभ्यो मन्त्रान् पूरयन्ति। यथा–'सं वपामि'[3] कल्पसूत्रानुसारमत्र 'देवस्य त्वा.....अग्नये अग्नीषोमाभ्यां' मन्त्रोऽयं देवतानुसारं प्रयुक्तो भवति, किन्तु शुक्लयजुर्वेदस्य मन्त्रप्रयोगे कल्पस्यापेक्षा न भवति।[4]

एवम्प्रकारेण यजुर्वेदस्य कृष्णत्वकारणेषु संहिता–ब्राह्मणयोः सांकर्यः, मन्त्रविनियोगस्य वैविध्यम्, संहितापाठस्य द्वेविध्यम्, मन्त्राणामपूर्णता, कतिपयेषाङ्– ग्रन्थनामस्त–व्यस्तता च प्रमुख कारणानि भवितुमर्हन्ति।

### यजुर्वेदस्य शाखाः

'सर्वमान्यपातञ्जलमहाभाष्यानुसारं' यजुर्वेदस्य एकोत्तरशतं[5] (101)

शाखा आसन्। तत्र कृष्णयजुर्वेदस्य षडशीतिः[6] (86), शुक्लयजुर्वेदस्य[7] च पञ्चदश(15)। तासु नेदानीं सर्वोपलब्धाः सन्ति।

### शुक्लयजुर्वेदीयाः शाखा

चरणव्यूहादिग्रन्थोक्तशुक्लयजुर्वेदीयशाखानां नामानि सायणेन काण्वभाष्य– भूमिकायाम् एवमुट्टङ्कितानि–

काण्वाः, माध्यन्दिनाः, शापेयाः, तापायनीयाः, कापालाः, पौण्ड्रवत्साः, आवटिकाः, परमावटिकाः, पाराशर्याः, वैधेयाः, वैनेयाः, औधेयाः, गालवाः, वैजपाः, कात्यायनीयाः।

तत्र नामवैभिन्यान्यपि विभिन्नग्रन्थेषु दृश्यन्ते। उपर्युक्तशाखासु साम्प्रतं काण्व–माध्यन्दिनी चेति द्वयमेवोपलब्धे स्तः।

### कृष्णयजुर्वेदीयशाखाः

कृष्णयजुर्वेदीयशाखासु वर्तमानेऽस्मिन् समये तैत्तिरीया, मैत्रायणीया, कठ, कपिष्ठला चेति चतस्रः शाखा एव उपलभ्यमानाः सन्ति।

### क. शुक्लयजुर्वेदः

महान्तपस्वी स्वाभिमानी च महर्षियाज्ञवल्क्यः भगवन्तमादित्याराध्य तस्मात्प्राप्तयजुर्वेदं काण्वदिपञ्चदशशिष्येभ्य उपदिदेश। तेऽपि

स्व–स्वशिष्येभ्यः। शाखापाठस्यादिप्रवक्तुर्याज्ञवल्क्यस्य प्रधानाः पञ्चदश (15) शिष्याः बभूवुः। तस्मात् कारणात् पञ्चदशशिष्यनाम्ना

15 शाखाः प्रसिद्धाः। आसाम्पञ्चदश शाखानमध्येतारः सर्वेऽपि

वाजसनेयीतिनाम्ना प्रसिद्धाः।

वाजसनेयि–नामकरणस्य कारणानि–शुक्लयजुर्वेदस्य वाजसनेयिनामकरणे विभिन्नकारणं भवितुमर्हति, किन्तु तत्र कारणद्वयमतीव प्रसिद्धमस्ति–

1. 'अन्नं वैवाजः' इति श्रुत्यनुसारं वाजशब्दस्यार्थो भवति अन्नम्। षणु दाने इत्यस्माद्धातोः सनि 'शब्दः निष्पद्यते। अतः वाजस्यत्रअन्नस्य, सनिःत्रदानं यस्य महर्षेस्ति सोऽयं वाजसनिः, तस्य पुत्रो वाजसनेयःत्रयाज्ञवल्क्यः। अर्थात् याज्ञवल्क्यस्य पिता देवरातः पौरोहित्ये कर्मणि प्रचुरान्नं प्राप्य स्वयमपि सर्वदा अन्नदानं करोति स्मेति कारणात् लोके वाजसनि नाम्ना प्रसिद्धो जातः। तत्पुत्रस्य याज्ञवल्क्यस्यापि अपरं नाम वाजसनेयो जातम्। तदनुयायिनः सर्वेऽपि वाजसनेयीति नाम्ना प्रसिद्धा इति सायणायार्चेणापि काण्वभाष्योपक्रमणिकायां लिखितमस्ति।
2. श्रीमद्भागवतानुसारं 'वाजि' शब्दस्यार्थो भवति अश्वः। अर्थात् वाजिशब्दः अश्वस्य पर्यायवाची अस्ति। याज्ञवल्क्यस्याराधनया सन्तुष्टः सूर्यः वाजिरूपेण याज्ञवल्क्यं शुक्लयजुर्वेदं पपाठ। तस्मादपि याज्ञवल्क्यः वाजसनेयनाम्ना प्रसिद्धः।

### माध्यन्दिनशाखाः

एवमनुश्रूयते यद् याज्ञवल्क्यस्य पञ्चदशशिष्येषेकः

आसीन्माध्यन्दिनः। माध्यन्दिनो येषां यजुर्मन्त्राणामध्यापनं चकार ते मन्त्राः माध्यन्दिनीयशाखानाम्नाः प्रसिद्धाः। माध्यन्दिनशाखानामकरणे अपरं कारणमेवं दीयते, यद्यदा याज्ञवल्क्यः वाजिरूपात् सूर्यात् शुक्लयजुर्वेदमधीतवान् तदा दिनस्य मध्यकाल आसीत्। अतः दिनस्य मध्यकाले अधतीकारणात् शुक्लयजुर्वेदः माध्यन्दिनशाखाशब्देन प्रसद्धिः। परन्तु कारणद्वये प्रथमं कारणमेव मन्मतानुसारं समीचीनं प्रतीयते।

माध्यन्दिनसंहितानाम्ना, वाजसनेयिसंहिता च नाम्ना प्रसिद्धेयं संहिता चत्वारिंशदध्यायेषु विभक्तास्ति। तत्र एकोनचत्वारिंशदध्यायेषु श्रौतकर्मप्रतिपादितमस्ति, चतवारिंशत्तमेऽध्याये ईशोपनिषदुपदिष्टास्ति। उपनिषदियं सर्वासूपनिषत्सु महत्त्वपूर्णास्ति।

### काण्वशाखाः

शुक्लयजुर्वेदस्योपलभ्यमानासु शाखासु द्वितीयास्ति काण्वशाखा। अस्याः प्रवक्तास्ति महर्षिः काण्वः। एतस्याः प्रचारोऽद्यत्वे महाराष्ट्र–कर्णाटक–तमिलनाडु– आन्ध्र–उत्कल–प्रान्तेष्वेव दृश्यते। अस्यामपि संहितायां चत्वारिंशदध्यायाश्चतुर्षु दशकेषु विभक्ताः सन्ति। प्रत्येकेऽध्याये कतिपयेऽनुवाकाः, अनुवाकेषु च मन्त्राः सन्ति। तत्रानुवाकानां संख्या अष्टाविंशत्युत्तरत्रिंशत् (328), मन्त्राश्च षडशीत्युत्तरसहस्रद्वयं (2086) सन्ति। काण्व–माध्यन्दिनयोः प्रतिपाद्यो विषयः समान एवास्ति। केवलं मन्त्राणां क्रमे पार्थक्यमस्ति।

### शुक्लयजुर्वेदीयब्राह्मणम्

समस्तब्राह्मणग्रन्थेषु सर्वाधिकमहत्त्वपूर्ण, विपुलकायं, यज्ञानुष्ठानस्य सर्वोत्तमं प्रतिपादकं, ब्राह्मणमिदम्। शुक्लयजुर्वेदस्य शाखाद्वये इदमेव ब्राह्ममुपलब्धमस्ति। विषयस्यैक्येऽपि वर्णनक्रमे अध्याय–संख्यासु च विभिन्नतास्ति। माध्यन्दिनीयशतपथब्राह्मणे चतुर्दश (14) काण्डानि, एकशतम् (100) अध्यायाः,

अष्टचत्वारिंशतोत्तरचतु:शतम् (438) ब्राह्मणानि, षट्शतचतुर्विंशदुत्तरशतसप्तसहस्र (7624) कण्डिकाश्च सन्ति। काण्वशाखायाः शतपथब्राह्मणे–सप्तदश (17) काण्डानि, चतुरुत्तरशतम् (104) अध्यायाः, पञ्चत्रिंशदुत्तरचतु:शतं[8] (435)

ब्राह्मणानि, अष्टशतषडुत्तरषट्सहस्र (6806) कण्डिकाश्च सन्ति। माध्यन्दिनशतपथे अष्टषष्टिः (68) प्रपाठकाः सन्ति, किन्तु काण्वशतपथे प्रपाठकाः न सन्ति। शतपथ–ब्राह्मणानुसारं मानवानां जीवनमेव यज्ञमयमस्तीति यज्ञस्य विशद्वर्णनमंत्रोपलभ्यते। उक्तञ्च–'यज्ञो वै श्रेष्ठतमं कर्म।'[9]

### शुक्लयजुर्वेदीयबृहदारण्यकम्

प्रायः आरण्यकानि ब्राह्मणग्रन्थानामन्तिमे भागे प्राप्यन्ते। अतः ब्राह्मणानां प्रवक्ता एव आरण्यकानाम्प्रवक्तापि कथ्यते। शतपथब्राह्मणस्य प्रवचनकर्ता आचार्यो महर्षिर्याज्ञवल्क्योऽस्तीति शुक्लयजुर्वेदीय–बृहदारण्यकस्यापि प्रपचनकर्ता आचार्यो महर्षिर्याज्ञवल्क्य एवास्तीति नि:संकोच वक्तुं शक्यते। शुक्लयजुर्वेदीयमाध्यन्दिन– शतपथब्राह्मणस्य चतुर्दशतमकाण्डं काण्वशाखायाःसप्तदशमं (17) काण्डं च शुक्लयजुर्वेदस्यारण्यकमस्ति। विषयदृष्ट्याआरण्यके उपनिषदि च साम्यमस्ति, यतो हि बृहदारण्यकादिग्रन्थाः उपनिषच्छब्देनापि कथ्यन्ते, किन्तु किञ्चित् पार्थक्यमपि लक्ष्यते। आरण्यकेषु

मुख्यरूपेण प्राणविद्यायाः प्रतीकोपासनायाश्च वर्णनं प्राप्यते, तत्रैवोपनिषत्सु निर्गुणब्रह्मस्वरूपस्य तत्प्राप्तेश्च विवेचनं कृतं दृश्यते। आरण्यकानां मुख्यविषयोऽस्ति– यज्ञेषु विद्यमानाध्यात्मिकतथ्यानां मीमांसा। अतः शुक्लयजुर्वेदीयबृहदारण्यकम् अस्यैव प्रतिपादनं करोति।

### उपनिषदः

मुक्तिकोपनिषदनुसारं शुक्लयजुर्वेदीय एकोनविंशतिः (19) उपनिषदःसन्ति, तासु ईशोपनिषद् बृहदारण्यकोपनिषच्चास्ति प्रधानेति।

### शुक्लयजुर्वेदीय–श्रौतसूत्रम्ः

शुक्लयजुर्वेदीय–श्रौतसूत्रेषु साम्प्रतमेकमेव श्रौतसूत्रमुपलब्धमस्ति, यस्य नामास्ति कात्यायनलिखित–'कात्यायन–श्रौतसूत्रम्'।[10] श्रौतसूत्रमिदं श्रौतयागानां संक्षिप्तं सुव्यवस्थितं च स्वरूपं प्रतिपादयति।

### शुक्लयजुर्वेदीय–गृह्यसूत्रम्ः

शुक्लयजुर्वेदीय–गृह्यसूत्रेषु अद्यत्वे पारस्करगृह्यसूत्रमेव मिलति। गृह्यसूत्रमिदं काण्डत्रये विभक्तमस्ति। त्रिषु काण्डेषु आवसथ्याधानादारभ्य विवाहादिसंस्काराणां पञ्चमहायज्ञ–श्रवणाकर्म–सीतायज्ञ–अवकीर्णप्रायश्चित्तादीनाञ्च

सम्यङ् निरूपणं कृतमस्ति।

### ख. कृष्णयजुर्वेदस्य परिचयः

कृष्णयजुर्वेदस्य षडशीति (86) शाखासु अद्यत्वे केवलं चतस्रः एव सन्त्युपलब्धाः–1. तैत्तिरीयशाखा[11], 2. मैत्रायणीशाखा[12], 3. कठशाखा[13], 4. कपिष्ठलशाखा[14] च।

### तैत्तिरीयशाखाः

तैत्तिरीयाभिधाने महीधराचार्योद्घाटितं रहस्यम्–वैशम्पायनाज्ञया याज्ञवल्क्योद्वमितां यजुर्विद्यां वैशम्पायनस्याऽन्ये शिष्यास्तित्तिरयो भूत्वा गृहीतकारणात् सा शाखा तैत्तिरीयनाम्ना प्रसिद्धेति मतं न सर्वैर्भारतीयैर्विद्वद्भिः मान्यं भवितुमर्हतीति 'वेदशाखापर्यालोचनम्' इति ग्रन्थे यत्कारणमुपस्थापितं तदेवात्रोपस्थाप्यते–

1. कृष्णयजुर्वेदमन्त्र–ब्राह्मण–आरण्यकानि सहैव पठ्यन्ते। अतः त्रीणि मन्त्रारण्यक– ब्राह्मणानि यस्मिन् वेदशब्दराशौ तरन्ति पठयन्ते, असौ तित्तिरिः'। शौनकीयचरण– व्यूहपरिशिष्टे यजुर्वेदस्य लक्षणप्रसड्गे अयमेव भावः प्रदर्श्यते–

'त्रिगुणं पठयते यत्र मन्त्रब्राह्मणयोः सह।
यजुर्वेदः स विज्ञेयः शेषाः शाखान्तराः स्मृताः।।'

2. तैत्तिरीयमन्त्र–ब्राह्मणयोः सांकर्यं स्पष्टमेवास्ति। अतः मन्त्र–ब्राह्मण–आरण्यकानि यस्यां शाखायां सम्मिलितानि अन्तर्हितानि वा सन्ति सैव शाखा तैत्तिरीयेति कथ्यते।
3. मन्मतानुसारं तित्तिरनामाचार्येण प्रवचनकारणात्तदनुयायिनस्तैतिरीयशब्देन व्यवप्रताः। एतस्याः शाखाया अध्येतारो भारतस्य दक्षिणदिग् (महाराष्ट्र–आन्ध्र–द्रविड़) भागेषु बहुलतया प्राप्यन्ते। एतस्याः स्वरूपविषये विद्वत्स्वमैक्यमस्ति। तैत्तिरीयसंहिता सारस्वतभेदेन, आर्षेयभेदेनच भागद्वये विभक्तास्ति। अद्यत्वे अस्याः शाखायाः या संहिता उपलब्धास्ति, सा सारस्वत परम्परारूपेण स्वीकृतास्ति, यस्यां मन्त्रब्राह्मणयोः सांकर्यं स्पष्टं दृश्यते। तथापि तैत्तिरीयसंहिता, तैत्तिरीयब्राह्मणम्,य तैत्तिरीयारण्यकञ्चेति पृथक्–पृथक् प्रकाशितमस्ति।

अस्याम्परम्परायामुपलब्ध– तैत्तिरीयसंहितायां सप्त (7) काण्डानि, चतुश्चत्वारिंशत्[15] (44) प्रपाठकाः, एकपञ्चाशदुत्तरषट्शत[16] (651) अनुवाकाश्च सन्ति। चरणव्यूहे प्रपाठकस्थाने[17] (44) प्रश्नानामुल्लेखोऽस्ति।[18]

### सन्दर्भ


1. जा0सं0 अ0 1
2. तै0सं0 1.1.1
3. तै0सं0 1.1.8
4. मा0सं0 1/21
5. शत0ब्रा0 2 3.3.15
6. तै0सं0 3.3.4
7. शत0ब्रा0 2 3.3.5
8. जा0सं0 अ0 5.6
9. मा0सं0 1/33
10. शत0ब्रा0 2 3.3.6
11. तै0सं0 1.3.7
12. मा0सं0 2/56
13. तै0सं0 2.1.9
14. मनुस्मृति 6'1.8
15. बृ0अ0 3, ब्रा0 7
16. तै0सं0 3.1.5
17. तै0सं0 1.6.7
18. मा0सं0 1.1.4